# श्री भक्तामर स्तोत्र पूजा




ॐ जय जय जय। नमोऽस्तु, नमोऽस्तु, नमोऽस्तु।

## अनुष्टुप छन्द



परमज्ञानवाणासि - घातिकर्म-प्रधातिनम्।
महाधर्म - प्रकर्त्तारं, वन्देऽहं नाभिनन्दनम्।।१।।
भक्तामरमहास्तोत्र - मन्त्रपूजां करोम्यहम्।
सर्वजीवहितागारम्, आदिदेवं नमाम्यहम्।।२।।

ॐ ह्रीं श्री आदिजिनेन्द्र ! अत्रावतरावतर संवोष्ट् इत्यावाहनम् । अत्र तिष्ठ तिष्ठ ठः ठः स्थापनम् ! अत्र मम सन्निहितो भव भव वषट् सन्निधिकरणम्।

## अथाष्टकम्



सुरसरीनदसम्भृतजीवनैः, सकलतापहरैः सुखकारणैः
वृषभनाथ ! वृषांकसमन्वितं, शिवकरं प्रयजे हतकिल्विषं।

ॐ ह्रीं श्री ऋषभनाथ जिनेन्द्राय जलम् निर्वपामीति स्वाहा।



चन्दन जल

मलयचन्दनमिश्रित कुंकुमैः, सुरभितागतषट्पदनन्दनैः
वृषभनाथ ! वृषांकसमन्वित, शिवकरं प्रयजे हतकिल्विष।
ॐ ह्रीं श्री ऋषभनाथ जिनेन्द्राय चन्दनम् निर्वपामीति स्वाहा।



सफेद चावल

कमलजाति समुद्भवतन्दुलैः, परमपावनपंचसुपुंजकैः
वृषभनाथ ! वृषांकसमन्वित, शिवकरं प्रयजे हतकिल्विष।
ॐ ह्रीं श्री ऋषभनाथ जिनेन्द्राय अक्षतम् निर्वपामीति स्वाहा।



पीले चावल

जलजचम्पकजातिसुमालती वकुलपाडलकुंद सुपुंजकैः
वृषभनाथ ! वृषांकसमन्वित, शिवकरं प्रयजे हतकिल्विषं।
ॐ ह्रीं श्री ऋषभनाथ जिनेन्द्राय पुष्पम् निर्वपामीति स्वाहा।



सफेद चिटकी

वटकखज्जकमण्डकपायसैः, विविधमोदकव्यंजनसद्रसैः
वृषभनाथ ! वृषकसमन्वित, शिवकरं पयजे हतकिल्विषं।
ॐ ह्रीं श्री ऋषभनाथजिनेन्द्राय नैवेद्यम् निर्वपामीति स्वाहा।



पीली चिटकी

रविकरद्युतिसन्निभदीपकैः, प्रवलमोहधनान्धनिवारकैः
वृषभनाथ ! वृषकसमन्वित, शिवकरं पयजे हतकिल्विषं।
ॐ ह्रीं श्री ऋषभनाथजिनेन्द्राय दीपम् निर्वपामीति स्वाहा।



धूप

अगुरुधूप भरे घंटनिष्ठिते, प्रतिदिशं मिलितालिसमूहकैः।
वृषभनाथ ! वृषकसमन्वित, शिवकरं पयजे हतकिल्विषं।
ॐ ह्रीं श्री ऋषभनाथजिनेन्द्राय धूपम् निर्वपामीति स्वाहा।



फल

नवकनिंबुकलांगलिदाडिमैः, कदलिपूगकपित्थशुभैः फलैः।
वृषभनाथ ! वृषकसमन्वित, शिवकरं पयजे हतकिल्विषं।
ॐ ह्रीं श्री ऋषभनाथ जिनेन्द्राय फलम् निर्वपामीति स्वाहा।



अर्घ

सलिलगंधशुभाक्षतपुष्पकैः, चरुसुदीपसुधुपफलार्घ्यकैः।।
जिनपतिं च यजे सुखकारकं, शिवकरं प्रयजै हतकिल्विषम्।
ॐ ह्रीं श्री ऋषभनाथजिनेन्द्राय अर्घ्यम निर्वपामीति स्वाहा।

वन सुगंध सु तन्दुल पुष्पकैः, प्रवर-मोदक-दीपकधूपकैः।
वरफलैः परमात्म-पद-प्रदं, प्रविजयजे श्री आदिपरमेश्वरम्॥

ॐ ह्रीं अष्टचत्वारिंशत्कमलेभ्यः पूर्णार्घ्यम्।

## जयमाला

प्रमाणद्वय - कर्त्तारं, स्यादस्ति - बाद वेदकं।
द्रव्यतत्वनयागारमादिदेवं नमाम्यहम् ॥१॥
आदि-जिनेश्वर-भोगागारं, सर्वजीव-वरदया-सुधारं।
परमानन्दरमासुखकन्दं, भव्यजीवसहित-करणमसन्दम् ॥२॥
परमपवित्र वंशवरमण्डन, दुख-दारिद्रकामबलखण्डन।
वेद-कर्म दुर्जय-बल-दण्डन, उज्जवलघ्यानप्रतिशुभ मण्डन ॥३॥
चतुरशीतिलख पूर्व जीवनधर, धनुषपंचशतमानस जिनवर।
हेमवर्णरूपौघविमल कर, नगर अयोध्या स्थानक व्रतधर ॥४॥
नाभिराय परमातम पिता, माता मरुदेवी गुणनेता।
सोल स्वप्न पर भेद विख्याता, त्रिभुवनायक पुत्र विधाता ॥५॥
गर्भकल्याणकसुरपति कीधा, जन्म कल्याणक मेरुशिर सीधा।
स्वयं स्वयम्भू दीक्षा धारी, केवलबोध सु त्रिभुवन प्यारी ॥६॥
गुणाकर सिद्ध दिवाकर, परमधर्म विस्तार करी।
शीतताप रहित भवहारी, निरुपम सर्वसौख्य गुणधारी ॥७॥
जय आदि सुब्रह्मा, त्रिभुवब्रह्मा, ब्रह्म स्वात्मरूवरूपधरं।
जयबोधसु ब्रह्मा, पंचसु ब्रह्माब्रह्मब्रह्म सुमति जलधि-निकरं ॥८॥

ॐ ह्रीं आदिपरमेश्वराय महार्घ्यम्।

## शार्दुल विक्रीडित छन्द

देवोऽनेकभवार्चितो गतमहापापः प्रदीपानलः
देवः सिद्धवधूविशालहृदयालंकार-हारोपमः।
देवोऽष्टादशदोषसिन्धुर घटा दुर्भेदपंचाननोः
भव्यानां विदधातु वांछितफलं श्री आदिनाथों जिनः ॥९॥

## श्लोक

लक्ष्मीचन्द्र गुरुर्विज्ञों, मूलसंघविदाग्रणीः।
पट्टेऽभयचन्द्रो देवो, दयानन्दि विदाम्बरः॥
रत्नकीर्तिः कुमुदेन्दुः, सुमतिः सागरान्तकः।
भक्तामर-महास्तोत्र पूजां चक्रे गुणाधिकाम् ॥१०॥

।इति भक्तामरस्तोत्रलघु पूजा समाप्ता॥